International Journal of Sanskrit Research 2018; 4(6): 25-26

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(6): 25-26
© 2018 IJSR
www.anantaajournal.com
Received: 07-09-2018
Accepted: 08-10-2018

**Kapil Maheshbhai Jani**
Post- Sanskrit Research Student,
Department- Sanskrit,
University- Maharaj Vinayak
Global University Jaipur,
Rajasthan, India

**Correspondence**
**Kapil Maheshbhai Jani**
Post- Sanskrit Research Student,
Department- Sanskrit,
University- Maharaj Vinayak
Global University Jaipur,
Rajasthan, India

# महाभारते स्त्रीधर्मस्य पर्यालोचनम्

**Kapil Maheshbhai Jani**

**प्रस्तावना**

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् |
देवीं सरस्वतीं व्यासं ततो जय मुदीरयेत ||[1]

भगवता बादरायण वेदव्यासेन वेदः श्रुति: स्मृतिः विभक्त: | ब्रह्मसूत्रं च तेषामेव योगदानं तद्वदेव सुविदितमस्त्येव महाभारतमपि भगवता कृष्णद्वैपायनेन एव सुग्रथितमस्ति |

"यदिहास्तितदन्यत्र, यन्नेहास्ति न तद् क्वचित्" [2]

यत् महाभारते नास्ति तत् कुत्रापि नास्ति यत् महाभारते अस्ति तत् सर्वत्र इति |

**महाभारते धर्म:**

धर्मेति धारणे धातुर्माहात्म्ये चैव पठ्यते |
धारणाच्च महत्वेन धर्म एष निरूध्यते || [3]
यः स्यात् प्रभवसंयुक्त: सधर्म इति निश्चयः |
य स्याद्धारणसंयुक्तः स धर्म इति निश्चयः || [4]
धारणाद्धर्ममित्याहु: धर्म: धारयते प्रजा |
यस्याधारणसंयुक्त स धर्म इति निश्चितः || [5]
धर्म एव हतो हन्ति धर्मोरक्षति रक्षितः |
तस्माधर्मो न हन्तोव्यो मा नो धर्मो हतोवधीत् || [6]

य: मानवं धारयति स धर्म इत्युच्यते | योग्यम्-अयोग्यम्, करणियम्-अकरणियम्, धारणियम्-अधारनियम्, कर्तव्यम्-अकर्तव्यम् इति धर्मलक्षणमस्ति | प्राणिनाम् अभ्युदयाय कल्याणाय शस्त जीवनाय च धर्म आज्ञां क्रियते | अनेन निश्चयेन अभ्युदयात्मक सिद्धिः भवत्येव| अयमेव धर्म इति धर्मवेत्तारः विनिश्चयन्ति निर्धारयन्ति च | धृञ धातो निष्पन्ने धर्म शब्दोत्पत्ति: धरतिलोकोनेन, धरतिलोकं वा धरति विश्वं इति धरति लोकान् ध्रियते वाजनैरिति | [7]

---

[1] महाभारत आदि पर्व १/१

[2] महाभारत आदि पर्व ६२/५३

[3] महाभारत कर्ण पर्व ६९/५८

[4] महाभारत शान्ति पर्व राजधर्मानुशासन पर्व १०९/१०-११

[5] मनुस्मृति प्रथम अध्याय

[6] महाभारत वन पर्व ३१३ / १२८

[7] अमरकोष १ / ६ /३

स्त्यायति गर्भो यस्यामिति स्त्री | सत्यै शब्दसंधातयोः धातोः आदेच उपदेशेशिति सूत्रेण स्त्यायति शब्दायते गुणान् गृह्णाति इत्यर्थे स्त्याः धातोः सूत्रमिदं प्रमाणयतु अध्यायः पादः सूत्रञ्च सूत्रेण ड्रट् प्रत्यये डित्वात् टिलोप: टित्वात् डीप भूत्वा स्त्री शब्दोत्पद्यते | पर्यालोचनम् मित्यर्थ : पुनर्निरिक्षणम् सम्यक्तया पुनर्वेक्षणञ्च | स्त्री धर्मस्य चर्यायां स्त्रीणां धर्म इति स्त्रीधर्मः | तासां धर्मसंबंधे यथा मातृधर्मः, भगिनीधर्मः, पत्निधर्मः, पुत्रीधर्म, आदर्शस्त्री धर्मश्च वर्तते | महाभारते विविधेषु स्थानेषु धर्मलक्षणानि धर्मप्रवचनानि स्त्रीयार्थे कृतानि |

महाभारते स्त्रीधर्मस्य पर्यालोचनम्

महाभारते यानि-यानि वस्तूनि जातानि तानि-तानि सर्वाण्यपि धर्माधीनानि आसन् | महाभारतमेकं विशिष्ट काव्यशास्त्रमस्ति | तद्यथा –

अर्थशास्त्रमिदं प्रोक्तं धर्मशास्त्रमिदं महत् |
कामशास्त्र मिदं प्रोक्तं व्यासेनामितबुद्धिना || [8]

अमितबुद्धिना व्यासेन महाभारते धर्मार्थकामशास्त्राणि प्रोक्तानि | भारतीयसमाजे स्त्रीणां समानाधिकाराः सन्ति | आर्यपुरूषेण स्त्रीभ्यः सर्वाः अधिकाराः प्रदत्ताः | स्त्रीआर्यपुरूषस्य अर्धाङ्गिनी, पुत्री, भगिनी, माता च वर्तते | अस्मिन् समाजे कुलस्त्रियः समादरं प्राप्नुवन्ति | पुरूषेण सदा सर्वदा स्त्रीभ्यः संरक्षणः प्रदत्ता : |

पिता रक्षति कैमारे भर्तारक्षतियौवने |
रक्षन्ति स्थाविरे पुत्रा न स्त्री स्वातन्त्र्यमर्हुति || [9]

पिता विवाहात्पूर्वं स्त्रियं रक्षेत्पश्चाद्भर्ता तदभावे पुत्राः | अभर्तृपुत्रायाः संनिहितायाः पित्रादिभिरपि रक्षिताः | भार्यायां रक्ष्यमाणायां प्रजां भवति रक्षिताः | प्रजायां रक्ष्यमाणायामात्मा भवति रक्षितः | यत्र स्त्रियः प्रसन्नाः रक्षिताः संवर्धिताः भवन्ति तत्र देवताः अपि प्रसन्नाः भवन्ति | यत्र एतासां सम्माननं न क्रियते तत्र सर्वाः क्रियाः निष्फ़ला: भवन्ति | स्त्री एव आधिदैविकाधिभौतिक आध्यात्मिकोन्नते: पथप्रदर्शिका वर्तते | महाभारते योगिश्वर श्रीकृष्णः स्वयमेव कथयति यत –

यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् |
तं तमेवैति कौन्तेय सदातद्भावभावितः || [10]

स्त्रियः अनेन पातिव्रतधर्मेणैव उन्नतलोकम्, भोगान्, मोक्षाश्चाप्नुवन्ति | अतः तास्यां कृते पातिव्रतधर्मस्य महत्वमुक्तम् | स्त्रियः परिवारस्य, समाजस्य, देश-राष्ट्र-विश्वस्य च मेरूदण्डेव भवन्ति| स्त्रीणां सर्वेषु क्षेत्रेषु बाहुल्यम्, अप्रतिमा प्रतिभा च वर्तते | भारतीय सामाजिक संस्कृतिषु स्त्रीयः आदरणीयाः, विशिष्टाः, गौरवपुर्णा, महत्वपुर्णा च सन्ति | स्त्रीषु ज्ञानात्मकम्, कालात्मकम्, क्रियात्मकञ्च सर्वाणि कौशलानि अभिहिताः भवन्ति | स्त्रियः यजने, दाने, बलौ, व्रते, तपसि, यमनिमादिषु, नित्य नैमित्तिक कर्मेषु च अग्रेसराः भवन्ति | तासामुपस्थिति सर्वदा श्रेयस्करी, यशस्करी, शुभकरी च वर्तते | स्त्रीयः वेदानां मंत्रद्रष्टी, पुराणानां व्याख्याकर्त्री बहूनि एतानि कौशलानि सर्वाभौम नाम् सर्वत्र सन्ति | गुरू अपि मातृरूपेण स्त्रिय एव भवन्ति | स्त्रिय एव भुक्तेः मुक्तेश्च हस्ताक्षरं वर्तते | सर्वाषु परिस्थितिषु रोगेषु च भार्यासमम् औषधं नास्ति | यदा पुरूषः अकिञ्चनो भवति तदा सः स्त्री छायायां पुनः शान्तिं प्राप्नोनि | स्त्री कल्पलता वर्तते | राष्ट्रस्यापि प्रतिष्ठा, गरिमा, समृद्धि, उन्नतिश्च सतिभिः स्त्रिभिः एव भवति | सा माता, भगिनी, भार्या, पुत्री, सखी, सहाय्यिका, मार्गदर्शिका, कार्यसाधिका, धर्मपदप्रदर्शिका च वर्तते |

वर्तमानकाले स्त्रीणां सशक्तिकरणं, स्त्रीजागृति, स्त्रीस्वावलंबनम् इत्यादयः विषयाः राजकीय-सामाजिक-धार्मिक-शैक्षणिकविभागेषु जागृता अभवन् | तत्सर्वं सर्वकारमाध्यमेन यत्किमपि स्यात् किन्तु वयमस्माकं शास्त्रेषु एवं विशेषरूपेण महाभारते पश्चामश्चेत् तदा तत्र शिक्षण-सङ्गीत-कला-युद्ध-धर्म-आयुर्विज्ञान-अस्त्र-शस्त्र-आचार-विचार-व्यवहार आदि क्षेत्रेषु एतासां नामानि विख्यातानि आसन् | स्त्रियः सर्वेषु क्षेत्रेषु अग्रगण्य आसन् | पुत्रोत्पादनात् युद्धं यावत एता कार्याणि कृतवत्यः तासां पवित्रता, नियमपरायणता, व्रतानि, तपोबलानि, चारित्र्यम् एव सशक्तिकरणस्य मुख्यानि अङ्गानि सन्ति | स्त्री यदि इच्छेत तर्हि सा द्रौपदीसमाना साम्राज्ञी, सावित्रीसमाना पतिपरायणा, कुन्तीसमाना पुत्रवती, गार्गीसमाना विदुषी, लोपामुद्रासमाना साधिका, सीतासमाना धैर्या, राधासमाना प्रेयसी, शबरीसमाना भक्तिमयी एवं गांधारी समाना तपस्वीनी भवितुमर्हति |

या नारी प्रयता दक्षा या नारी पुत्रिणी भवेत् |
पतिव्रता पतिप्राणा सा नारी धर्मभागिनी || [11]

**सन्दर्भ ग्रन्थ**


1. महर्षि वेदव्यास प्रणीत महाभारत, गीता प्रेस, गोरखपुर
2. नारीअङ्क कल्याण गीता प्रेस, गोरखपुर
3. धर्मशास्त्राअङ्क, कल्याण, गीता प्रेस, गोरखपुर
4. अमरसिंह कृत अमरकोशमूल चौखम्भा संस्कृत भवन, वाराणसी
5. महर्षि वेदव्यास रचित श्रीविष्णुधर्मोत्तर पुराण, चौखम्भा संस्कृत भवन, वाराणसी
6. कुल्लुकभट्ट प्रणीत मनुस्मृति, चौखम्भा संस्कृत भवन, वाराणसी


[8] महाभारत आदि पर्व ३ / ३८३

[9] मनुस्मृति ९ / ३

[10] महाभारत भीष्म पर्व ३२ / ६

[11] श्री विष्णुधर्मोत्तरपुराण ३ / ३२२ / ११